International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 32-34
© 2026 IJMH
www.themultijournal.com

Received: 25-02-2026
Accepted: 07-03-2026
Publish : 09-03-2026

**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

**Correspondence:**
**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

# पाणिनीयशब्दशास्त्रं नितरामभिव्यज्यते

**Dr. Markanda Nayak**

'मुखं व्याकरणं स्मृतम्"[१] इत्युक्त्या व्याकरणशास्त्रमिदं वेदाङ्गेषु मुख्यं स्थानं सततं भजतेतराम्। प्रोक्तञ्च भगवता पतञ्जलिना 'प्रधानं च षट्स्वङ्गेषु व्याकरणम्, अतः प्रधाने च कृतो यत्नः फलवान् भवतीति"[२]। तदर्थमृते व्याकरणज्ञाद् नैव सफलायते जगत्यस्मिन्। व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दा अननेति इति व्युत्पत्त्या व्योपसर्गाभ्यां डुकृञ् करणे इत्यस्माद्धातोः करणार्थे ल्युटि प्रत्यये व्याकरणशब्दोऽयं निष्पद्यते। तद्विषये श्रीमता पतञ्जलिना समाक्षितं यत् - 'एक: शब्द: सम्यग् ज्ञात: सुप्रयुक्त: स्वर्गे लोके कामधुग् भवतीति[३]।"

भाषा हि मानवस्य भावप्रकाशस्य प्रधानमाध्यमं भजते। सा व्याकरणशास्त्रेण नियन्त्रिता सुव्यवस्थिता च वर्तते। यथा संस्कृतसाहित्यवाङ्मये- वाल्मीकि-व्यास-कालिदासप्रभृतय: मनीषिणः विद्योतन्ते । तथैव व्याकरणवाङ्मयेऽपि नैके वैयाकरणाः स्फुटयन्ति नितरामिदं शास्त्रम् । तदुक्तम् -

**'ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।**
**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्[४] ॥"**

यद्यपि एते श्रेयांसः वैयाकरणा आसन् । तथापि तेषु रचितेषु व्याकरणेषु पाणिनीयव्याकरणमिदं सर्वत्र विश्वस्मिन् विश्वे शास्त्रग्राहिणामाद्यस्थानमलङ्करोतीति निश्चप्रचम्। पुरा यावन्ति शब्दशास्त्राणि लिखितानि, तावत्सु शब्दशास्त्रेषु सर्वोत्तमं प्रामाणिकशब्दशास्त्रं पाणिनीयशब्दशास्त्रमिति लौकिकवैदिकप्रयोगाणामर्थसिद्धित्वात् । अपि तु अमुष्मिन् तुण्डशास्त्रे विशालता,क्रमबद्धता, वैज्ञानिकता, दूरदृष्टिसम्पन्नतादयः दरीदृश्यते। परञ्च लक्ष्मीवता पाणिनिना स्वकीयपुस्तकं विरच्य संस्कृतभाषाया: शुद्धता संरक्षितेति ।

पाणिनीयव्याकरणन्तु मूलत: सूत्रशैल्या: विरचितम् । अत्राष्टावध्याया: सन्ति, ते च प्रत्येकं चतुर्षु पादेषु विभक्तास्सन्ति। प्रत्येकस्मिन्नध्यायेऽनिर्दिष्टानि सूत्राणि संबद्धानि भवन्ति । अत्र अइउणित्यादीनि प्रत्याहारसूत्रसहितानि ३९९६ सूत्राणि समुपदिष्टानि[५]। केषाञ्चिन्मते ३९९५ सूत्राणि उपनिबद्धानि सन्तीति ।

व्याकरणानि त्रिषु भागेषु विभक्तानि तत् यथा - छान्दस-लौकिक-वैदिक-अलौकिकानीति। तत्राद्यं छान्दसं प्रातिशाख्यादिलौकिकं कातन्त्राद्युभयविधं व्याकरणं पाणिन्यादिः। न केवलं तु अष्टाध्यायीभावेन नापि तु अष्टकम्, अष्टिका[६], शब्दानुशासनम्[७], वृत्तिसूत्रम्[८] इति नामान्तरै: प्राप्यते।

वैदिकपदपादस्य व्याकरणशास्त्रीयव्युत्पत्तिमूलकत्वेन वैदिकपदपाठात् पूर्वमेव व्याकरणस्य समुदयोऽ-भूदिति विद्वद्भिः स्वीक्रियते। लिङ्ग-वचन-विभक्ति-आख्यान-नाम-प्रत्ययप्रभृतय: व्याकरणशास्त्र-सम्बन्धिन: पारिभाषिकशब्दा: गोपथब्रह्मणेऽपि[९] अवलोक्यन्ते ।

पाणिने: शब्दानुशासनं न केवलं शब्दसाधुत्वार्थमपि तु प्राचीनभूगोलस्य प्राचीनस्य इतिहासस्य च परिज्ञानार्थं सहायकं भवति । आचार्यस्य पाणिनेरभ्रन्तिं प्रदर्शयता भाष्यकारेण पतञ्जलिना उक्तम्-

'प्रमाणभूतम् आचार्यो दर्भपवित्रपाणि: शुचावकाशे प्राङ्मुखम् उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म"। तत्र च नह्येकेन वर्णोनाप्यनर्थकेन भवितव्यम्, किं पुनरियता सूत्रेण[१०] इति।

शब्दानुशासनत्वबोधकं सूत्रमयं लक्ष्यलक्षणात्मको ग्रन्थविशेषो हि व्याकरणम् । शब्दो लक्ष्य: सूत्रं लक्षणम् इति । अथ पुनरस्तु सूत्रमिति च[११]। 'अग्नये त्वा हु जुष्टं निर्वपामि" इत्यादौ श्रुतिवाक्यादौ सूर्य्योद्देश्यताकत्वविवक्षायां सूर्याय त्वाजुष्टं निर्वपामि इत्याद्युह: केवलं व्याकरणेनैव सिद्धिर्भवति।

'स्थूलपृषतीनामग्निवारुणिमनड्वाहीमालभेत[१२]" इत्यादिषु प्रयोगेषु व्याकरणस्याध्येता हि विजानाति प्रयोगेऽस्मिन् क: समास: नोचेत् 'इन्द्रशत्रुर्वर्धस्व[१३]" इति विचारात् एव व्याकरणैव दृश्यते। यत्र नामाख्यातोपसर्गनिपातरूपचतुर्विधपदज्ञानं भूतभविष्यद्वर्त्तमानतद्वान्तराद्यतनकालज्ञानम्, व्यंग्यव्यञ्जकशब्दज्ञानं सप्तविभक्तिज्ञानं तत्तद्वर्णिनामुर: कण्ठधिरोरूपस्थानत्रयज्ञानं व्याकरणाधीनम् तत्रेयं श्रूति: - 'चत्वारि वाग्" इति। अथवा 'परा, पश्यन्ती, मध्यमा, वैखरी" इति चतस्रो वाचः। तत्र त्रिस्रो मूलाधारस्वाधिष्ठानमणिपूरकाख्येषु स्थानेषु क्रमेण सन्ति। तुरीयां वैखर्यां वाचं मनुष्या: आस्येनोच्चारयन्ति। एवञ्च वर्णानामुत्पत्त्यादिक्रमो व्याकरणाधीनम्[१४]। पृथिव्यां विद्यमानानां चतुर्दशविद्यानां सर्वोत्तमेयं विद्येति सर्वैः शास्त्रविद्भिरङ्गीकृतम्। अपि च मीमांसाद्यपेक्षया सततं पवित्रासौ विद्येति । यदस्ति दर्शनशास्त्रे मोक्षप्राप्तेः स्वरूपं तयैव पद्धत्या अनेन शब्दब्रह्मणा मोक्षप्राप्तिर्भवत्येव । तदुक्तं भर्तृहरिणा वाक्यपदीये-

**'तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते[१५] ।।"**

किं नाम शास्त्रमित्याकाङ्क्षायामुच्यते लक्ष्यधर्मिकसाधुत्वप्रकारकाप्रामाण्यज्ञानास्कान्दितबोधजनकत्वं शास्त्रमिति। अर्थात् साधुबोधकत्वं व्याकरणमिति। अपि चेदं शास्त्रं समेषां शास्त्राणां सर्वोपकारकत्वं निर्वहति । तदेव उच्यते येन असाधुशब्देभ्यः साधुशब्दाः निष्पद्यते तद् व्याकरणमिति। तदर्थं अस्य व्याकरणशास्त्रस्य शब्दापशब्दज्ञानव्यवस्था विद्यतयिति बुद्धैराक्षितम् ।। तदर्थं प्रोच्यते-

**'पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्**

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन्[१६]।।"**

नान्तरेण व्याकरणं नैवार्थस्य प्रतिति र्भवितुमर्हति। किञ्च सकलशास्त्रवेदवेदाङ्गभूतज्ञानमनेनैव शब्देन प्रकाश्यते। अपि च शिष्टानुशिष्टानां तथ्यानां प्रकाशनञ्च भाषामन्तरेण अन्येन केनोपायेन भवितुं नार्हति इति सश्रद्धं वचनञ्च तदुक्तं वाक्यपदीये भर्तृहरिणा-

**'न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते ।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।**

**ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा**

**तथैव सर्वशब्दानामेते पृथगिव स्थिते[१७] ।।**

तत्र शब्दशुद्धत्वं साधुशब्दानां प्रयोगविज्ञानं वा व्याकरणाधीनम् । 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृति:" इति तत्रैव वाक्यपदीये प्रत्यपादि। काणादपाणिनीयञ्च सर्वशास्त्रोपकारकमिति भणितिः सर्वथैव अङ्गीकरणीयम् । यतोहि एतयोः न्यायव्याकरणशास्त्रयोः ज्ञानानन्तरं नैव किमपि शास्त्रस्य प्रत्यययायावशिष्टं स्यात् । अर्थात् व्याकरणमध्ययनेन सर्वेषां शास्त्राणां श्रवणग्राही भवितुमर्हेत्।

**'यो वेद वेदवदनं सदनं हि सम्यक्**

**ब्रह्मुयास वेदमपि वेद: किमन्यशास्त्रम्**

**यस्मादत: प्रथममेतदधीत्य धीमान्**

**शास्त्रान्तरेषु भवति श्रवणाधिकारी ।।**

यद्यपि साधुत्वमाख्यानं व्याकरणम् । तथापि लोके साध्पभ्रंशैः शब्दैः संसारोऽयं प्रव्रजति। अपि तु शिष्टानुशिष्टानां शब्दानां प्रयोग: काव्यादर्शे दृश्यते ।-

**'इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।**

**वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते[१८] ।।**

'सर्वज्ञानमयो हि स हि मनुस्मृते: मेधातिथिवचनानुसारं निखिलमिदं व्याकरणशास्त्रं वेदे उपलभ्यमानं वर्त्तते। अपि च शब्दशास्त्रस्य प्रमाणभूताचार्यो भगवान् पतञ्जलि: अस्य शब्दब्रह्मणः चत्वारि पदानि, त्रयः काला इत्यादिरूपेण व्याकरणमानुगमकं व्याकरणाध्ययनस्य प्रयोजनं निर्दिशन् दर्शितम् ऋक्संहितायाम्। यथा-

**'चत्वारि शृङ्गा त्रयो अस्य पादा:**

**द्वे शीर्षे सप्त हस्तासो अस्य ।**

**त्रिधा बद्धो वृषभो रोरवीति**

**महो देवो मर्त्यां आविवेश ।।[२०]"**

ऋचमिमं प्रोच्य चत्वारि श्रृङ्गाणि- चत्वारि पदजातानि, नामाख्यातोपसर्गनिपातश्च। त्रयो अस्य पादाः -त्रयः कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे द्वौ शब्दात्मानौ- नित्यः कार्यश्च । सप्त हस्तासो अस्य – सप्त विभक्तयः । त्रिधा बद्धः – त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति शब्दं करोति । तथैव अपरेयं श्रुतिवाक्यं प्रमाणितं यथा-

**'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्रह्मणा ये मनीषिणः**

**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।"**

इत्यादि मन्त्राणां वाख्यां व्याकरणशास्त्रपरकामेव कृतवान्। तथा चोक्तं तन्त्रकारेण- 'ब्रह्मा वृहस्पतये प्रोवाच,वृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय,भरद्वाज: ऋषिभ्य:, ऋषयो ब्रह्मणेभ्य:[२१]"। यामलाष्टकतन्त्रकर्त्तार: ऋग्वेद-कल्पद्रुमकर्त्तारोऽपि एतद्विषये सहमता: सन्ति । काशिकावृत्तौ च पञ्चानां व्याकरणानामुल्लेख: कृतः। तेषां नामानि च निर्दिष्टानि। केचन तत्र सूत्रपाठ:, धातुपाठ:, गणपाठ:, उणादिपाठ:, लिङ्गानुशासनानि अन्ये च पदच्छेद: समासवृत्ति:, अनुवृत्तिरिति उदाहरणानि अवगच्छन्ति। न्यायमञ्जुषाय्यां जयन्तेन 'मरणान्तो व्याधि: व्याकरणमिति औशन सा[२२]" इति वचनमुद्धृतमिति। एवं

रूपेण व्याकरणस्य महत्वमनेकाभिः ऋग्भिः मन्त्रैः श्लोकैश्च प्रतिपाद्यते। सर्वदैव लोकेऽस्मिन् तुण्डशास्त्रमिदं लोकोपकारकं भवति। तदर्थमेव व्याहृतं – काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम् इति। काणादं वैशेषिकं(न्यायमित्यङ्गीक्रियते) पाणिनीयं व्याकरणं शास्त्रद्वयं सर्वेषां शास्त्राणाम् उपकारकं भवतीत्याशयः ।

**पादटिप्पन्यः-**

[१] पाणिनीयशिक्षा-श्लो.८२१

[२] म.भा.(प.आ.)मो.व,प्र.भा. पृ-१६

[३] म.भा.(६.१.८४)मो.व,द्वि.भा. पृ-७३२

[४] सं.व्या.शा.का.इति प्र.भा. पृ-६५

[५] अष्टिका पाणिनीयाष्टध्यायी, बालमनोरमा, भाग १ पृ-५१-लाहोर:

[६] व्या.म.भा.-पृ-१

[७] व्या.म.भा.-२.१.१

[८] गोपथब्रह्मणे,पूर्वार्धे,१.२४

[९] व्या.म.भा.-१.१.१

[१०]म.भा.

[११]तथैव

[१२]तथैव

[१३]त्रिमुनिकल्पतरु:।

[१४]वा.प.

[१५]वा.प.

[१६]काव्यादर्श:

[१७]पा.सू-३.३.९०

[१८]म.भा.

[१९]सं.व्या.शा.का.

[२०]न्या.म.

[२१]सं.व्या.शा.का.

[२२]न्या.म.